# द्रुतवाचनम्

## (प्रहेलिका)

[जीवन की आरम्भिक अवस्था में बौद्धिक विकास, तर्कशक्ति की प्रखरता, कल्पनाशक्ति के संवर्धन तथा मनोरञ्जन की दृष्टि से संसार की प्रमुख भाषाओं में प्रहेलिकाओं का विकास हुआ है। इन्हें "पहेली" तथा Riddles कहा जाता है। इन्हें सुनकर शिक्षार्थी अपनी कल्पना तथा तर्क के द्वारा उत्तर खोजने का प्रयास करता है जिससे उसकी बौद्धिक क्षमता बढ़ती है। संस्कृत भाषा में भी प्राचीन काल से ही प्रहेलिकाएँ रही हैं। यहाँ प्राचीन और आधुनिक दोनों प्रकार की प्रहेलिकाओं का संकलन प्रस्तुत किया गया है। शिक्षार्थी पहले अपनी कल्पना से इन्हें हल करने का प्रयास करें तब दिये गये उत्तरों से समाधान प्राप्त करें।]

नित्यं भ्रमति योगी न महदुष्णो न पावकः ।<br>
विकासयति यः पद्मं वृत्ताकारो वदन्तु कः ? ॥1॥

वर्धते यः कदाचित्तथा क्षीयते<br>
दृश्यते वा कदाचिन्न तद् दृश्यते ।<br>
वारिधिर्नास्ति नैवाऽस्ति वायुस्तथा,<br>
कोऽस्ति सः तस्य किन्नामधेयं सखे ? ॥2॥



विश्वप्रसिद्धा भुवि राजमाना,<br>
प्रकाशमाना न रविर्न वह्निः ।<br>
न रूपमेवाऽस्ति तथापि लोके,<br>
सर्वत्र सर्वैरवलोक्यते का ? ॥3॥



भ्रमामि नित्यं न शशी न भानुः
चक्राणि मे सन्ति न तेषु वायुः ।
वहामि लोकान् न च वायुयानं,
वदन्तु मे किं खलु नामधेयम् ? ॥4॥

गगने डयते न खगो न सुरो,
न शशिर्न रविर्हनुमानपि नो ।
जनवाहनमस्ति भुवि प्रथितं,
नरनिर्मितमस्ति सखे ! वद किम् ॥5॥

अस्थि नास्ति शिरो नास्ति,
बाहुरस्ति निरंगुलिः ।
नास्ति पादद्वयं गाढम्,
अंगमालिंगति स्वयम् ॥6॥

**उत्तराणि** – 1. सूर्यः, 2. चन्द्रमाः, 3. विद्युत्,
4. रेलयानम्, 5. आकाशवाणी (रेडियो), 6. कञ्चुकः (कुर्ता


**शब्दार्थाः**

| | | |
|---|---|---|
| नित्यम् | – | प्रत्येक दिन |
| भ्रमति | – | घूमता है |
| योगी | – | साधक |
| न/नो | – | नहीं |
| महदुष्णः | – | अत्यधिक गर्म |
| पावकः | – | आग |
| विकासयति | – | विकसित करता है |
| यः | – | जो |
| पद्मम् | – | कमल |
| वृत्ताकारः | – | गोल आकार का |
| वदन्तु | – | कहें, बोलें, बताएँ |
| वर्धते | – | बढ़ता है |
| कदाचित् | – | कभी |
| क्षीयते | – | घटता है |
| दृश्यते | – | दिखाई देता है |
| वारिधिः | – | समुद्र |
| किन्नामधेयम् | – | किस नाम का |

| | | |
|---|---|---|
| सखे | – | मित्र (सम्बोधन) |
| भुवि | – | धरती में, पृथ्वी में |
| राजमाना | – | सुशोभित है, विराजमान है |
| प्रकाशमाना | – | प्रकाशित होती हुई |
| रविः | – | सूर्य |
| वह्निः | – | आग |
| रूपम् | – | आकार, स्वरूप |
| लोके | – | संसार में |
| सर्वत्र | – | सभी जगह |
| सर्वैः | – | सभी लोगों के द्वारा |
| अवलोक्यते | – | देखी जाती है |
| शशी | – | चन्द्रमा |
| भानुः | – | सूर्य |
| चक्राणि | – | पहिये (बहुवचन) |
| वायुयानम् | – | हवाई जहाज |
| खलु | – | निश्चय ही |
| गगने | – | आकाश में |
| डयते | – | उड़ता है |

| | | |
|---|---|---|
| खगः | – | पक्षी |
| सुरः | – | देवता |
| जनवाहनम् | – | लोगों का वाहन |
| प्रथितम् | – | प्रसिद्ध |
| अस्थि | – | हड्डी |
| नरनिर्मितम् | – | मनुष्य द्वारा बनाया हुआ |
| शिरः | – | सिर |
| निरंगुलिः | – | बिना अंगुली वाला |
| पादद्वयम् | – | दो पैर |
| गाढम् | – | बहुत अधिक |
| अंगम् | – | शरीर में |
| आलिंगति | – | लिपटता है |

## सन्धि विच्छेदः –

| | | |
|---|---|---|
| महदुष्णः | = | महत् + उष्णः |
| कदाचिन्न | = | कदाचित् + न । |
| वारिधिर्नास्ति | = | वारिधिः + नास्ति । |
| वायुस्तथा | = | वायुः + तथा । |
| कोऽस्ति | = | कः + अस्ति । |

| | | |
|---|---|---|
| किन्नामधेयम् | = | किम् + नामधेयम् । |
| रविर्न | = | रविः + न |
| रूपमेवाऽस्ति | = | रूपम् + एव + अस्ति |
| रविर्हनुमानपि | = | रविः + हनुमान् + अपि |
| नास्ति | = | न + अस्ति |
| बाहुरस्ति | = | बाहुः + अस्ति |
| निरंगुलिः | = | निः + अंगुलिः |

**प्रकृति–प्रत्यय विभागः**

| | | |
|---|---|---|
| भ्रमामि | – | √भ्रम् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| वदन्तु | – | √वद् , लोट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| अस्ति | – | √अस् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| वहामि | – | √वह् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| दृश्यते | – | √दृश् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| सन्ति | – | √अस् , लट्लकारः, प्रथमपुरुषः, बहुवचनम् |

## अभ्यासः

### (मौखिकः)

1. **प्रहेलिकाः सस्वरं गायत ।**
2. **अधोलिखितानां पदानां धातुं वदत ।**

(क) अस्ति, सन्ति, वदति, भ्रमामि, वदन्तु, वहामि, ।

3. **अधोलिखितानां पदानाम् अर्थं वदत–**

खगः, पावकः, अस्थि, पादद्वयम्, कदाचित्, वर्धते, सर्वत्र, विकासयति, प्रकाशमाना, सुरः, गगनम् ।

## (लिखितः)

1. **एकपदेन उत्तरं दत्त –**

(क) सूर्यः नित्यं किं करोति ?

(ख) कः क्षीयते वर्धते च ?

(ग) खगः कुत्र डयते ?

(घ) गगने शशिवत् नित्यं कः भ्रमति ?

(ङ) भुवि प्रचितं किम् ?

(च) कीदृशः कञ्चुकस्य बाहुः अस्ति ?

(छ) अंगम् कः आलिंगति ?

2. **उचितं मेलनं कुरुत–**

| | |
|---|---|
| (क) विश्वप्रसिद्धा भुवि | (i) खगो न सुरः |
| (ख) भ्रमामि नित्यं न | (ii) तथापि लोके |
| (ग) न रूपमेवाऽस्ति | (iii) शिरो नास्ति |
| (घ) गगने डयते न | (iv) राजमाना |
| (ङ) अस्थि नास्ति | (v) शशी न भानुः |

3. **अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत** –

वायुस्तथा, रविर्न, नास्ति, नैवाऽस्ति, किन्नामधेयम्, कोऽस्ति, महदुष्णः

4. **पर्यायवाचिनः शब्दान् लिखत**–

यथा – भानुः = रविः

(क) पावकः – –

(ख) शशीः – –

(ग) वायुः – –

(घ) गगनम् – –

(ङ) खगः – –

(च) सुरः – –

(छ) भुवि – –

5. **अधोलिखितपदेषु लकारं पुरुषं वचनं च लिखत** –

| | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| यथा–पठन्तु | लोट्लकारः | प्रथमपुरुषः | बहुवचनम् |
| (क) भ्रमति | – | – | – |
| (ख) अस्ति | – | – | – |
| (ग) वदन्तु | – | – | – |
| (घ) सन्ति | – | – | – |
| (ङ) भ्रमाणि | – | – | – |
| (च) वहामि | – | – | – |
| (छ) दृश्यते | – | – | – |

◆◆◆